सुभाषित व्याकरण - २१

Subhāṣita Vyākaraṇa - 21

(A compilation of Saṃskṛta well said verses with full grammar and meaning)

Compiler: Kishore Nayak
Editor: Padmakar Gangatirkar

शुक्रवार,श्रावण शुक्ल प्रतिपदा, १९४४, शुभकृत संवत्सर

आचारलक्षणो धर्मः सन्तश्चारित्रलक्षणाः।
साधूनां च यथावृत्तमेतदाचारलक्षणम् ॥३१५॥ - महाभा. अनुशासन पर्व १३.१६१.९

आचारलक्षणः धर्मः (अस्ति)। सन्तः चारित्रलक्षणाः च (सन्ति)। साधूनाम् यथावृत्तम्, एतद् आचारलक्षणम् च (भवति) ॥

Bhishma, fron his deatbed instructing Yudhisthira on duties of the ruler, what is Dharma, etc"
"Good behaviour is the sign of right way of living (धर्म). Noble or saintly people exhibit good character. The conduct of noble people is the (ideal) behaviour (to be followed)."

आचारलक्षणः- a sign of good behaviour- आचार- behaviour, conduct, लक्षणः- distinctive mark, sign, characteristic, आचारस्य लक्षणः- आचारलक्षणः- ष. तत्पुरुष स. & धर्मः- right codes of conduct- both in- पु. लिं. प्र. वि. ए. व., सन्तः & चारित्रलक्षणाः- both in- पु. लिं. प्र. वि. ब. व. of सत्- noble, good, saintly, proper, virtuous, worthy etc. & चारित्रलक्षण- a sign of good character, behaviour- चरित्र- conduct, behaviour, performance, character, चारित्र- pertaining to चरित्र, चारित्रस्य लक्षणः- चारित्रलक्षणः- ष. तत्पुरुष स., साधूनाम्- पु. लिं. ष. वि. ब. व. of साधु- a sage, saintly person, noble man- यथावृत्तम्- as behaved, as conducted- यथा- अव्यय- as, like, similar to, वृत्तम्- behaved, conducted- (वृत्त- क. भू. धा. वि. of वृत्- वर्तते १ ग. आ. प. to be, to behave, to exist)- वृत्तम् अनुसृत्य- यथावृत्तम्- अव्ययीभाव स., एतद्- this, it- न. लिं. प्र. वि. ए. व., च- and

धर्मार्थौ धर्मकामौ च कामार्थौ च अपीडयन् ।
धर्मार्थकामान्योऽभ्येति सोऽत्यन्तं सुखमश्नुते ॥३१६॥ -महाभा- शल्यपर्व अ ६०

धर्मार्थौ, धर्मकामौ च कामार्थौ च, यः अपीडयन् धर्मार्थकामान् अभ्येति, सः अत्यन्तम् सुखम् अश्नुते॥

Right code of conduct and wealth, right code of conduct and pleasures, pleasures and wealth are human objectives (पुरुषार्थ). One, who approaches them without conflict, achieves maximum happiness in life.

धर्मार्थौ, धर्मकामौ & कामार्थौ- all in पु. लिं. द्वि. वि. द्वि. व. of धर्मार्थः, धर्मकामः & कामार्थः- all द्वंद्व स. of धर्मः च अर्थः च, धर्मः च कामः च & कामः च अर्थः च-respectively; धर्मार्थकामान्- पु. लिं. द्वि. वि. ब. व. of धर्मार्थकामः - धर्मः च अर्थः च कामः च - द्वंद्व स.- धर्मः- right codes of conduct, अर्थः- wealth, object, purpose, कामः- desire, enjoyment, love, sensual enjoyment, यः, सः & अपीडयन्- all in पु. लिं. प्र. वि. ए. व. of यद्- who, तद्- he & अपीडयन्- without troubling, hurting- न पीडयन्- अपीडयन्- नञ् तत्पुरुष स.- पीडयन्- वर्त. का. वा. धा.

सा. वि. of पीड्- पीडयति- ते १० ग. उ. प. to trouble, hurt, torment, अभ्येति & अश्नुते- वर्त. प्र. पु. ए. व. of अभि+ इ- to approach, face, meet, follow- (इ-एति २ ग. प. प. to go, go to) & अश्- अश्नाति- अश्नुते- ८ ग. उ. प. to eat, enjoy, get, अत्यन्तम् & सुखम्- न. लिं. द्वि. वि. ए. व. of अत्यन्त- adjctv- excessive, very much- अति- अव्यय- very, much, excessive, अन्त- end, finish- अन्तम् अतिक्रम्य- अत्यन्तम्- अव्ययीभाव स. & सुख- happiness, joy

परित्यजेदर्थकामौ यौ स्यातां धर्मवर्जितौ ।
धर्मं चाप्यसुखोदर्कं लोकविक्रुष्टं एव च ॥३१७॥ -मनुस्मृती ४.१७६
पाभे: लोकविक्रुष्टं= लोकविद्विष्टं

यौ अर्थकामौ धर्मवर्जितौ स्याताम्, (तौ) (मनुष्यः) परित्यजेत् । (तथा) (यद्) धर्मम् असुखोदर्कम् अपि च लोकविक्रुष्टम् (लोकविद्विष्टम) (स्यात् तद् मनुष्यः) एव च (परित्यजेत्) ॥

One should give up any wealth and personal desires, which are against the right way of living. In addition, he should also discard any code of conduct, which results in perpetual sorrow and which are unkind to (or hated by) the people.

यौ, अर्थकामौ & धर्मवर्जितौ- all in पु. लिं. प्र. वि. द्वि. व. of यद्- which, who, अर्थकाम- wealth and desire- अर्थः च कामः च - अर्थकामौ- द्वंद्व स. & धर्मवर्जित- devoid of right codes of conduct धर्म- right codes of conduct, वर्जित- devoid of, absence of- क. भू. धा. वि. of वृज्- वर्जति १ ग. प. प. to shun, avoid- धर्मेण वर्जितम्- तृ. तत्पुरुष स., स्याताम्- विध्यर्थ प्र. पु. द्वि. व. of अस्- अस्ति २ ग. प. प. to be, to exist, परित्यजेत्- विध्यर्थ प्र. पु. ए. व. of परि+ त्यज्- to leave fully- (त्यज्- त्यजति १ ग. प. प. to leave, quit), धर्मम्, असुखोदर्कम्, लोकविक्रुष्टम् & लोकविद्विष्टम्- all in न. लिं. द्वि. वि. ए. व. of धर्म, असुखोदर्क- one which results in perpetual sorrow, सुखम्- न. लिं. - happiness, joy - न सुखम्- असुखम्- unhappiness, trouble- नञ् तत्पुरुष स., उदर्कम्- result, consequence, असुखस्य उदर्कम्- असुखोदर्कम्- ष. तत्पुरुष स., लोकविक्रुष्टम्- cruel to the world, unkind to people- लोक- world, people, विक्रुष्ट- harsh, cruel- क. भू. धा. वि. of वि+ क्रुश्- to mourn, cry out- (क्रुश्- क्रोशति १ ग. प. प. to cry, lement)- विक्रुष्टम् लोकम्- लोकविक्रुष्टम्- विशेषणोत्तरपदकर्मधारय स. & लोकविद्विष्टम्- hated or disliked by the world (people)- विद्विष्टम्- hated, disliked- विद्विष्ट- क. भू. धा. वि. of विद्विष्- (वि+ द्विष्- द्वेष्टि- दिष्टे- २ ग. उ. प.)- to have enmity, dislike- लोकेन विद्विष्टम्- लोकविद्विष्टम्- तृ. तत्पुरुष स, अपि-also, even, च-and, एव- just, only- all अव्ययs

बुभुक्षां जयते यस्तु स स्वर्गं जयते ध्रुवम्।
यदा दानरुचिः स्याद्वै तदा धर्मो न सीदति ॥३१८॥ -महाभा. आश्वमेधादिकपर्व १४.९२.७०

यः बुभुक्षाम् तु जयते, सः स्वर्गम् ध्रुवम् जयते। यदा दानरुचिः वै स्यात्, तदा धर्मः न सीदति॥

One, who conquers hunger (of other people), he is sure to enter the heavens. Dharma, the right way of living, will not perish, as long as there is desire to help (the people in need),

यः (यद्)- who, सः (तद्)- he & धर्मः- right way of living- all in पु. लिं. प्र. वि. ए. व., बुभुक्षाम्- स्त्री. लिं. द्वि. वि. ए. व. of बुभुक्षा- hunger, desire to eat, appetite, स्वर्गम् & ध्रुवम्- both in पु. लिं. द्वि. वि. ए..व. of स्वर्ग- heaven, paradise & ध्रुव- adjctv- certain, sure, inevitable, दानरुचिः- interest in benevolence, interest in helping- दान- giving, donation, giving up, रुचिः- स्त्री. लिं.- interest, desire, liking, zest- दाने रुचिः- दानरुचिः- स. तत्पुरुष स., स्यात्- विध्यर्थ तृ. पु. ए. व. of अस्- अस्ति २ ग. प. प. to be, to exist, जयते- वर्त. आ. प. प्र. पु. ए. व. of जि- जयति १ ग. प. प. (normally)- to conquer, defeat, win & सीदति- वर्त. प्र. पु. ए. व. of सद्- १ ग. प. प. to perish, go to ruin, to be in distress, तु- but, on the other hand, वै- surely, indeed, न- no, not, यदा- when, in which case, तदा- then, in that case- all अव्ययs

अक्रोधेन जयेत् क्रोधमसाधुं साधुना जयेत् ।
जयेत् कदर्यं दानेन जयेत् सत्येन चानृतम् ॥३१९॥ - महाभा. उद्योग पर्व ३८.७३. १७४

क्रोधम् अक्रोधेन जयेत्। असाधुम् साधुना जयेत्। कदर्यम् दानेन जयेत् (तथा) अनृतम् च सत्येन जयेत् ॥

Let one conquer anger with calmness. Let one conquer wickedness with noble behaviour. Let one conquer a miser with charity. Let one conquer falsehood with truth.

क्रोधम्, असाधुम्, कदर्यम् & अनृतम्- all in पु/न. लिं. द्वि. वि. ए. व. of क्रोध- anger, wrath, असाधु- wicked person, bad character- साधु- noble, good, saintly- न साधुः- असाधुः- नञ् तत्पुरुष स., कदर्य- (कृपण)- a miser & अनृत- falsehood, untruth- ऋतम्- truth, अन् ऋतम्- अनृतम्- नञ् तत्पुरुष स., अक्रोधेन, साधुना, दानेन & सत्येन- all in पु/न. लिं. तृ. वि. ए. व. of अक्रोध- absence of anger, calmness- क्रोधः- anger- न क्रोधः- अक्रोधः- नञ् तत्पुरुष स., साधु- noble, good, saintly, दान- donation, benevolence, gift & सत्य- truth जयेत्- could be won over- विध्यर्थ **प्र**. पु. ए. व. of जि- जयति १ ग. प. प. to conquer, defeat, win, च-and

आत्महेतोः परार्थे वा नर्महास्याश्रयात् तथा ।
ये मृषा न वदन्तीह ते नराः स्वर्गगामिनः ॥३२०॥

ये नराः आत्महेतोः परार्थे वा नर्महास्याश्रयात् तथा इह मृषा न वदन्ति, ते स्वर्गगामिनः (भवन्ति) ॥

(Said by Shiva to Parvati)

In this world, those who do not ever tell a lie, in their own interest or interest of others, even jokingly, their wishes to go to heaven will be fulffiled.

ये, ते, नराः & स्वर्गगामिनः- all in पु. लिं. प्र. वि. ब. व. of यद्- who, तद्- he, नर- man, human & स्वर्गगामिन्- one who wants to heaven- स्वर्ग- heaven, paradise गमिन्-adjctv-Intending to go; गामिनः(?)ब. व ? - स्वर्गं गन्तुं इच्छन्ति इति - स्वर्गगामिन्- उपपद तत्पुरुष स., आत्महेतोः- ष. वि. ए. व. of आत्महेतुः- one's own interest or cause, आत्मन्- self, one's own, हेतु- purpose, interest, cause, reason- आत्मनः हेतुः- आत्महेतुः- ष. तत्पुरुष स., परार्थे- स. वि. ए. व. of- परार्थ- for the sake of others- पर- other, another, अर्थ- purpose, interest- परस्य अर्थः- परार्थः - ष. तत्पुरुष स., नर्महास्याश्रयात्- पं. वि. ए. व. of नर्महास्याश्रय- नर्मन्- न. लिं.- diversion, pleasure, joke, हास्यम्- न. लिं.-humor, joke, आश्रय- recourse, shelter, support- नर्म हास्यम्- नर्महास्यम्- विशेषणपूर्वपद कर्मधारय स. & नर्महास्यस्य आश्रयः- नर्महास्याश्रयः- ष. तत्पुरुष स, वदन्ति, वा- or, and, न- no, not, मृषा- falsely, unruly, wrongly, इह- here, in this world, तथा- and, likewise, in the same way- all अव्यय

चित्तमिन्द्रियसेनाया नायकं तज्जयाज्जयः।
उपानद्गूढपादस्य ननु चर्मावृतैव भूः ॥३२१ अ॥ - योगवासिष्ठ ६ उत्तरार्ध- १६३.३
पूर्णे मनसि संपूर्णं जगत्सर्वं सुधाद्रवैः ।
उपानद्-गूढपादस्य ननु चर्मास्तृतैव भूः ॥३२१ ब॥ – योगवासिष्ठ ५.२१.१४

अ) (नरस्य) चित्तम्, (तस्य) इन्द्रियसेनायाः नायकम् (अस्ति)। तज्जयात् जयः (भवति)। उपानद्गूढपादस्य, भूः ननु चर्मावृता एव (भाति) ॥

A) One's mind is the Commander of the Army of all his sensory organs. Control over the mind is a real victory! A person with his his feet covered by footwear feels that whole world is covered by leather.

ब) मनसि पूर्णे (नराय) सर्वम् जगत् सुधाद्रवैः संपूर्णम् (इव भाति)। उपानद्गूढपादस्य भूः ननु चर्मास्तृता एव (भाति) ॥

B) When a person is fully contented in his mind, he feels like whole world is overflowing with nectar. A person, having his feet covered by footwear, feels that whole world is covered by leather.

चित्तम्- mind, heart thinking, नायकम्- leader, master, जगत्- world, सर्वम्- all, entire, संपूर्णम्- fully filled- सम्- अव्यय - prefix to verbs & verbal derivatives means: greatly, thoroughly, completely- पूर्णम्- full, packed, filled- क. भू. धा. वि. of पूर्- पूर्यते ४ ग. आ. प. to fill, satisfy- all in न. लिं. प्र. वि. ए. व., इन्द्रियसेनायाः- स्त्री. लिं. ष. वि. ए. व. of इन्द्रियसेना- a

army of sensory organs- इन्द्रिय- sensory organ, सेना- an army- इन्द्रियाणाम् सेना- इन्द्रियसेना- ष. तत्पुरुष स., तज्जयात्- पु. लिं. पं. वि. ए. व. of तज्जयः- conquering it, victory over it- तद्- it, that, जयः -win, victory, तस्य जयः- तज्जयः- ष. तत्पुरुष स., उपानद्गूढपादस्य- पु. लिं. ष. वि. ए. व. of उपानद्गूढपाद- one whose feet are covered by footwear- उपानह्- स्त्री. लिं.- a shoe, sandal, footwear, गूढ- covered, hidden, concealed- क. भू. धा. वि. of गुह्- गूहति- ते १ ग. उ. प. to cover, hide, पाद- foot- गूढौ पादौ यस्य सः- गूढपादः- बहुव्रीही स., उपानदोः गूढपादौ यस्य सः- उपानद्गूढपादः- बहुव्रीही स., भूः- earth, world, चर्मावृता & चर्मास्तृता- covered by leather- चर्मन्- न. लिं- skin, leather, hide, आवृता- covered & आस्तृता- spread over- आवृत & आस्तृत- both क. भू. धा. वि. of आ+ वृ- to cover, conceal, hide- (वृ- वरति-ते, वृणोति- वृणुते, वृणाति- वृणीते- १, ५ & ९ ग. उ. प. to choose) & आ+ स्तृ- to cover, cloth- (स्तृ- स्तृणोति- स्तृणुते ५ ग. उ. प. to spread, cover), मनसि & पूर्णे- न. लिं. स. वि. ए. व. of मनस्- mind, heart & पूर्ण- contended- (see above), सुधाद्रवैः- पु. लिं. तृ. वि. ब. व. of सुधाद्रवः- flow of nectar, liquid ambrosia- सुधा- nectar, ambrosia, द्रवः- liquid, flow- सुधायाः द्रवः- सुधाद्रवः- ष. तत्पुरुष स., ननु- surely, certainly, indeed, एव- just, only- both अव्ययs

मम प्रतिज्ञां च निबोध सत्यां,
वृणे सत्यममृताज्जीविताच्च
राज्यं च पुत्राश्च यशो धनं च
सर्वं न सत्यस्य कलामुपैति ॥३२२॥ - महाभा वनपर्व ३४.२२

मम सत्याम् प्रतिज्ञाम् च निबोध। (अहम्) अमृतात् जीवितात् च सत्यम् वृणे। सर्वम् राज्यम् च, पुत्राः च, यशः धनम् च सत्यस्य कलाम् न उपैति॥

(Said by Yudhistir to Bheema)
Listen to my honest vow. I will always choose the path of truth over life and immortality. The entire kingdom, the children, the fame and the wealth all together, do not measure up even to a small fraction of the truth.

मम- mine ष. वि. ए. व. of अस्मद्- I, we, सत्याम्, प्रतिज्ञाम् & कलाम् - स्त्री. लिं. द्वि. वि. ए. व. of सत्य- truthful, sincere, honest, प्रतिज्ञा- strong resolve, vow, solemn affirmation & कला- a small fraction, निबोध- आज्ञार्थ द्वि. पु. ए. व. of नि+ बुध्- to understand, learn, know- (बुध्- बोधति-ते १ ग. उ. प. & बुध्यते ४ ग. आ. प. to know, understand), अमृतात् & जीवितात्- न. लिं. पं. वि. ए. व. of अमृतम्- immortality- मृत- dead- न मृत- अमृत- नञ् तत्पुरुष स.- मृत- क. भू. धा. वि. of मृ- म्रियते- ४ ग. आ. प. to be dead, to die & जीवितम्- living, being alive- जीवित- क. भू. धा. वि. of जीव्- जीवति- १ ग. प. प. to live, be alive, सत्यम्- न. लिं. द्वि. वि. ए. व. of सत्य- (see above), वृणे- वर्त. उत्तम पु. ए. व. of वृ- वरति- ते, वृणोति- वृणुते, वृणाति- वृणीते- १, ५

& ९ ग. उ. प. to choose, पुत्राः- पु. लिं. प्र. वि. ब. व. of पुत्र- son, सर्वम्- entire, all, राज्यम्- kingdom, यशः (यशस्)- fame, success, glory, धनम्- wealth, money- all in न. लिं. प्र. वि. ए. व., सत्यस्य- न. लिं. ष. वि. ए. व. of सत्य- (see above), उपैति- वर्त. प्र. पु. ए. व. of उप+ इ- to approach, come near, close to- (इ- एति २ ग. प. प. to go), च- and, न-no, not- both अव्ययs

जन्मेदं व्यर्थतां नीतं भवभोगोपलिप्सया ।
काचमूल्येन विक्रीतो हन्त चिन्तामणिर्मया ॥३२३॥ - सुभषितरत्नाकर

हन्त, (मया), इदम् जन्म भव-भोग-उपलिप्सया व्यर्थताम् नीतम् (भवति)। मया चिन्तामणिः काचमूल्येन विक्रीतः (अस्ति) ॥

Alas, I have squandered away my life for my desire to enjoy sensual pleasures of the worldly life. I have bartered away precious wish fulfilling jewel (Chintamani) for a price of a glass bead !

इदम्- this, जन्म (जन्मन्)- life, birth & नीतम्- taken, spent- नीत- क. भू. धा. वि. of नी- नयति-ते १ ग. उ. प. to carry, lead, bring, take)- all in न. लिं. द्वि. वि. ए. व., व्यर्थताम्- स्त्री. लिं. द्वि. वि. ए. व. of व्यर्थता- wasteful, uselessness- व्यर्थ- useless, waste, ता- suffix implies quality- भवभोगोपलिप्सया- स्त्री. लिं. तृ. वि. ए. व. of भवभोगोपलिप्सा- a desire to enjoy sensual pleasures of the worldly life- भव- worldly life, भोग- enjoyment, carnal pleasure, उपलिप्सा- a desire to obtain- भवस्य भोगः- भवभोगः & भवभोगस्य उपलिप्सा- भवभोगोपलिप्सा- both ष. तत्पुरुष स., मया- by me- तृ. वि. ए. व. of अस्मद्- I, we, चिन्तामणिः- a gem that is supposed to yield its possessor all desires, a philosopher's stone & विक्रीतः- sold, exchanged, bartered- क. भू. धा. वि. of वि+ क्री- to sell, barter, exchange- (क्री- क्रीणाति- क्रीणीते ९ ग. उ. प. to buy, purchase), काचमूल्येन- न. लिं. तृ. वि. ए. व. of काचमूल्यम्- price of a glass beed- काच- glass bead, मूल्यम्- value- काचस्य मूल्यम्- काचमूल्यम्- ष. तत्पुरुष स., हन्त- अव्यय- a particle implying grief, pity, joy, surprise

प्राप्ताः श्रियस्सकलकामदुधास्ततः किम्
न्यस्तं पदं शिरसि विद्विषतां ततः किम्।
संपादिताः प्रणयिनो विभवैस्ततः किम्
कल्पं स्थिताः तनुभृतां तनवस्ततः किम्॥३२४॥ - भर्तृहरी वैराग्यशतक -६७

(मनुष्येण) सकलकामदुधाः श्रियः प्राप्ताः (सन्ति), ततः किम्? विद्विषताम् शिरसि पदम् न्यस्तम्, ततः किम्? विभवैः प्रणयिनः संपादिताः, ततः किम्? तनुभृताम् तनवः कल्पम् स्थिताः, ततः किम्?

So what if one can achieve everything he desires by his acquired wealth? If one can place his foot on heads of his enemies (conquer them), then what? If he acquires host of friends because of his wealth, then what next? If living beings are able live until the end of world (achieve immortality), what is the use? (There is no limit for the desires of a person.)

श्रियः, सकलकामदुधाः, प्राप्ताः, स्थिताः & तनवः- all in स्त्री. लिं. प्र. वि. ब. व. of श्री- wealth, riches, prosperity, सकलकामदुधा- one that is yielding everything that one can desire for- सकल- adjctv,- all, entire, काम- wish, desire, दुध- (दुघ)- adjctv- milking, yielding, granting- कामम् दोहयति (दुधुक्षति) इति- कामदुधः (कामदुघः)- उपपद तत्पुरुष स. & सकलः कामदुधः- सकलकामदुधः- विशेषणपूर्वपद कर्मधारय स., स्थिता- remained, stayed- (स्थित- क. भू. धा. वि. of स्था- तिष्ठति १ ग. प. प. to stay, stand), तनु-body, form, विद्विषताम् & तनुभृताम्- पु. लिं. ष. वि. ब. व. of विद्विष्- enemy, foe, adversary & तनुभृत्- living being, human, one with a body, तनुम् बिभर्ति इति- तनुभृत्- उपपद तत्पुरुष स, शिरसि- न. लिं. स. वि. ए. व. of शिरस्- head, top, पदम्- foot & न्यस्तम्- placed, laid- (न्यस्त- क. भू. धा. वि. of नि+ अस्- to lay, place, deposit- अस्-अस्ति २ ग. प. प. to be)- both in -न. लिं. द्वि. वि. ए. व., कल्पम्- पु. लिं. द्वि. वि. ए. व. of कल्पः- end of world, a period of universal destruction, विभवैः- पु/न. लिं. तृ. वि. ब. व. of विभव- wealth, riches, power, might, प्रणयिनः & संपादिताः- पु. लिं. प्र. वि. ब. व. of प्रणयिन्- well-wisher, friend, beloved & संपादित- obtained, achieved- क. भू. धा. वि. of प्रयोजक of सं+ पद्- संपादयति- to accomplish, obtain, achieve- (पद्- पद्यते ४ ग. आ. प. to go, approach), ततः- (ततस्)- thence, from that, then किम्- a particle of interrogation- ततः किम्- then what? What next? So what? -allअव्यय

भोगे रोगभयं कुले च्युतिभयं वित्ते नृपालाद्भयम्
माने दैन्यभयं बले रिपुभयं रूपे जराया भयम्।
शास्त्रे वादिभयं गुणे खलभयं काये कृतान्ताद्भयम्
सर्वं वस्तु भयान्वितं भुवि नृणां वैराग्यमेवाभयम् ॥३२५॥ -भर्तृहरी वैराग्यशतक ३१

भोगे रोगभयम्, कुले च्युतिभयम्, वित्ते नृपालात् भयम्, माने दैन्यभयम्, बले रिपुभयम्, रूपे जराया भयम्, शास्त्रे वादिभयम्, गुणे खलभयम्, काये कृतान्तात् भयम् (भवति)। नृणाम् भुवि सर्वम् वस्तु भयान्वितम् (अस्ति)। वैराग्यम् एव अभयम् (अस्ति)॥

Enjoying pleasures of life brings fear of diseases. A renowned family is afraid of loosing its reputation. Wealthy people fear the King (for taxes). In holding on to self-pride, there is fear of poverty. The powerful fear from their enemies. A beautiful appearance is threatened by advancing age. Knowledge of science or scriptures may be challenged by the wise and learned. Wicked people can threaten those who follow virtuous path. For the body, there is fear of death. Thus, on this earth, everything is

associated with fear for all! (Therefore), total detachment from worldly life alone is fearless.

भोगे, कुले, वित्ते, बले, माने, रूपे, शास्त्रे, गुणे & काये- all in स. वि. ए. व. of भोगः- enjoyment, object of pleasure, कुलम्- family, race, वित्तम्- wealth, possession- (वित्त- क. भू. धा. वि. of विद्- विंदति- ते- ६ ग. उ. प. to acquire, obtain, find), बलम्- strength, power, might, मानः- respect, pride, honour, रूपम्- form, appearance, beauty, शास्त्रम्- knowledge of science or scripture, गुणम्- quality, virtue, कायः (कायम्)- body, भयम्- apprehension, fear, dread, रोगभयम्- fear of disease, रोगः- disease, sickness- रोगस्य भयम्, च्युतिभयम्- fear of losing- च्युतिः- स्त्री. लिं.- deprivation, losing- च्युतेः भयम्, दैन्यभयम्- fear of pitiable condition, दैन्य- pitiable condition, poverty- दैन्यस्य भयम्, रिपुभयम्- fear of enemy, रिपुः- enemy- रिपोः भयम्, खलभयम्- fear of wicked person- खलः- wicked person- खलस्य भयम्- all -ष. तत्पुरुष स., वादिभयम्- fear of wise and learned- वादि- wise, learned- वादिनः भयम्- ष. तत्पुरुष स., सर्वम्- all, entire, वस्तु- object, matter, भयान्वितम्- followed by fear, connected with dread- अन्वितम्- connected with, followed by- (अन्वित- क. भू. धा. वि. of अनु+ इ- to follow, conform- इ- एति- २ ग. प. प. to go), वैराग्यम्- detachment from worldly pleasures, dissatisfaction, अभयम्- free from fear- all above न. लिं. प्र. वि. ए. व., जरायाः- स्त्री. लिं. ष. वि. ए. व. of जरा- old age, aging, नृपालात् & कृतान्तात्- पु. लिं. पं. वि. ए. व. of कृतान्तः- the God of death, Yama & नृपालः- king, ruler- नृ- man, person, पालः- protector, guardian- नृणाम् पालः- नृपालः- ष. तत्पुरुष स., नृणाम्- पु. लिं. ष. वि. ब. व. of नृ- man, person, भुवि- स्त्री. लिं. स. वि. ए. व. of भू- earth, world, एव- अव्यय- just, alone, only

वनेषु दोषा प्रभवन्ति रागिणां
गृहेषु पञ्चेद्रियनिग्रहस्तपः।
अकुत्सिते कर्मणि यः प्रवर्तते
निवृत्तरागस्य गृहं तपोवनम् ॥३२६॥ - गरुड पुराण

रागिणाम् दोषाः वनेषु (अपि) प्रभवन्ति। गृहेषु (स्थिते) पञ्चेद्रियनिग्रहः तपः (अस्ति)। निवृत्तरागस्य यः अकुत्सिते कर्मणि प्रवर्तते, (तस्य) गृहम् तपोवनम् (इव भवति) ॥

The weaknesses of those who are under the control of their sensory organs, spring up even after going to forest. Control over the five sensory organs while staying at home is the (real) penance. One who is engaged in noble deeds and has relinquished all his passions, his house is like a sacred grove.

रागिणाम्- पु. लिं. ष. वि. ब. व. of रागिन्- one who is under the influence of his sensory organs, passionate, sensualist, दोषाः- पु. लिं. प्र. वि. ब. व. of दोष- fault, weakness वनेषु &

गृहेषु- both in न. लिं. स. वि. ब. व. of वनम्- forest & गृहम्- home, residence, प्रभवन्ति- वर्त. तृ. पु. ब. व. of प्र+भू- to arise, spring up- (भू-भवति १ ग. प. प. to be, to exist), पञ्चेद्रियनिग्रहः- control over five sensory organs- पञ्चन्- five, इद्रियम्- sensory organ, निग्रहः- control, suppression- पञ्चानाम् इन्द्रियाणां समाहारः- पञ्चेद्रियम्- न. लिं. ए. व. द्विगु स. & पञ्चेद्रियाणाम् निग्रहः- पञ्चेद्रियनिग्रहः- ष. तत्पुरुष स. & यः (यद्)- who- both in पु. लिं. प्र. वि. ए. व., निवृत्तरागस्य- पु. लिं. ष. वि. ए. व. of निवृत्तरागः- one who has relinquished his passions- निवृत्त- relinquished, retired, abstained from- क. भू. धा. वि. of नि+ वृत्- to abstain, to be free of- (वृत्- वर्तते १ ग. आ. आ. प. to be, to exist, remain), रागः- passion, affection, amorous feeling- निवृत्तः रागः यस्य सः- निवृत्तरागः- बहुव्रीही स., अकुत्सिते & कर्मणि- both in न. लिं. स. वि. ए. व. of अकुत्सितम्- blemishless- कुत्सित- condemned, censured- क. भू. धा. वि. of कुत्स्- कुत्सयते १० ग. आ. प. to abuse, condemn- न कुत्सित- अकुत्सित- नञ् तत्पुरुष स. & कर्मन्- work, doing, प्रवर्तते- वर्त. तृ. पु. ए. व. of प्र+ वृत्- to be engaged in, to strive, exert- (वृत्- see above), गृहम्- home, तपः (तपस्)- penance, religious austerity & तपोवनम्- a sacred grove in which ascetics practice penance- तपस्- न. लिं.- penance, वनम्- forest, grove- तपसः वनम्- तपोवनम्- ष. तत्पुरुष स.- all in न. लिं. प्र. वि. ए. व.

मोक्षस्य न हि वासोऽस्ति न ग्रामान्तरमेव वा ।
अज्ञानतिमिरग्रन्थिनाशो मोक्ष इति स्मृतः ॥३२७॥ -शिवगीता १३.३२

मोक्षस्य वासः न हि अस्ति, न ग्रामान्तरम् एव वा (अस्ति)। (बुधैः) अज्ञानतिमिरग्रन्थिनाशः मोक्षः इति स्मृतः (अस्ति)।

"Liberation" (मोक्षः) is not a particular place nor is it some other destination. It is defined as removing darkness of ignorance from our own body (Self-Realization).

मोक्षः- deliverance, final emancipation, liberation- वासः- place of stay, abode, house, स्मृतः- specified, laid down, defined- क. भू. धा. वि. of स्मृ- स्मरति- १ ग. प. प. to remember, lay down, declare & अज्ञानतिमिरग्रन्थिनाशः- destruction darkness of ignorance from organs, ज्ञान- knowledge, understanding, realization- न ज्ञानः- अज्ञानः- lack of realization, ignorance- नञ् तत्पुरुष स., तिमिर- darkness, ग्रन्थि- an organ, part or joint of the body, नाशः- elimination, destruction- अज्ञानः एव तिमिरः- अज्ञानतिमिरः & अज्ञानतिमिरः इव ग्रन्थिः- अज्ञानतिमिरग्रन्थिः- both उपमानपूर्वपदकर्मधारय स. & अज्ञानतिमिरग्रन्थेः नाशः-, अज्ञानतिमिरग्रन्थिनाशः- ष. तत्पुरुष स.- all in पु. लिं. वि. ए. व., मोक्षस्य- पु. लिं. ष. वि. ए. व. of मोक्ष, अस्ति- वर्त. प्र. पु. ए. व. of अस्- २ ग. प. प. to be, to exist, ग्रामान्तरम्- another village, ग्राम- village, hamlet, अन्तर- adjctv- another, other- अन्तरम् ग्रामम्- ग्रामान्तरम्-

विशेषणोत्तरपदकर्मधारय स., इति- a particle used to report the very words spoken- thus, so, न- no, not, हि- indeed, surely, एव- just, only, alone, वा- or, and- all अव्ययs

अर्थी तु शक्यते भोक्तुं कृतकार्योऽवमन्यते।
तस्मात्सर्वाणि कार्याणि सावशेषाणि कारयेत् ॥३२८॥ - -महाभा शान्तिपर्व १४०.२०

अर्थी तु भोक्तुम् शक्यते। कृतकार्यः (सः), (त्वां) अवमन्यते। (मनुष्यः) तस्मात् सर्वाणि कार्याणि सावशेषाणि कारयेत्॥

A needy person can take advantage of you. Having fulfilled his needs, he can ignore you. Therefore, one should finish all the works (with him) with some balance left.

अर्थी & कृतकार्यः- पु. लिं. प्र. वि. ए. व. of अर्थिन्- one who is desirous of seeking help, one who solicits & कृतकार्यः - one whose job has been done- कृत- done, fulfilled- क. भू. धा. वि. of कृ- करोति- कुरुते ८ ग. प. प. to do, make, कार्यः- work, job, that needs to be done- कार्य- also (करणीय, कर्तव्य & कृत्य)- क. वि. धा. सा. वि. of कृ- to do)- भोक्तुम्- to be able to enjoy, utilize, rule- पू. का. वा. तुमन्त धा. सा. अव्यय of भुज्- भुनक्ति- भुंक्ते ७ ग. उ. प. to enjoy, utilize, rule, शक्यते -कर्मणि प्रयोग प्र. वि. ए. व. of शक्- शक्नोति ५ ग. प. प. to be able, be competent, अवमन्यते- वर्त. प्र. वि. ए. व. of अव+ मन्- to disregard, think lightly of, despise- (मन्- मन्यते- ४ ग. आ. प. to think, consider, believe), कारयेत्- cause to get it done- प्रयोजक विध्यर्थ प्र. वि. ए. व.- कृ- to do, तस्मात्- therefore, from that- पं. वि. ए. व. of तद्- that, it, सर्वाणि, कार्याणि & सावशेषाणि- न. लिं. द्वि. वि. ब. व. of सर्व- all, entire, every, कार्य- (see above) & सावशेष- having a remainder, balance left- अवशेष- remainder, balance- अवशेषेण सह- सहावशेष or सावशेष- सहबहुव्रीही स., तु-surely, indeed- अव्यय

ऊधः छिन्द्यात्तु यो धेन्वाः क्षीरार्थी न लभेत्पयः।
एवं राष्ट्रमयोगेन पीडीतं न विवर्धते॥३२९॥   -- महाभा. शान्तिपर्व ७१.१६

यः क्षीरार्थी धेन्वाः ऊधः छिन्द्यात्, (सः) पयः तु न लभेत्। एवम् अयोगेन पीडीतम् राष्ट्रम् न विवर्धते॥

Longing for (more) milk, if one cuts off the cow's udder, he will not get any milk at all. Similarly, a nation would never prosper, if its subjects were tortured in an improper way.

यः & क्षीरार्थी- पु. लिं. प्र. वि. ए. व. of यद्-who & क्षीरार्थिन्- क्षीरम्- milk, अर्थिन्- one who wants, one who is desirous- क्षीरस्य अर्थिन्- क्षीरार्थिन्- ष. तत्पुरुष स., धेन्वाः (धेनोः)- स्त्री. लिं. ष. वि. ए. व. of धेनु- a cow, ऊधः & पयः- न. लिं. द्वि. वि. ए. व. of ऊधस्- udder & पयस्- milk,

(also mean water), छिन्द्यात् & लभेत्- विध्यर्थ प्र. पु. ए. व. of छिद्- छिनत्ति- छिंत्ते ७ ग. उ. प. to cut, lop off & लभ्- लभते १ ग. आ. प. to get, obtain, राष्ट्रम्- country, nation, state & पीडीतम्- troubled, tortured- (पीडीत- क. भू. धा. वि. of पीड्- पीडयति- ते १० ग. उ. प. to hurt, trouble, torture)- both in न. लिं. प्र. वि. ए. व., अयोगेन- पु/न. लिं. तृ. वि. ए. व. of अयोग- improper way, unfit manner- न योगः - अयोगः- नञ् तत्पुरुष स.- योगः -diligence, endeavour, fitness- विवर्धते- prospers- वर्त. प्र. पु. ए. व. of वि+ वृध्- to prosper, grow steadily- (वृध्- वर्धते १ ग. आ. प. to grow, increase), तु- but, on the other hand, न- no, not, एवम्- thus, so, in this manner- all अव्ययs

किं गजेन प्रभिन्नेन राजकर्माण्यकुर्वता।
स्थूलोऽपि यदि वाऽस्थूलः श्रेयान् कृत्यकरः पुमान् ॥३३०अ॥
पाठभेदः
किं गजेन प्रभिन्नेन गजकर्माण्यकुर्वता।
स्थले वा यदि वा निम्ने श्रेयान् कृत्यकरः च यः॥३३०ब॥

(अ) प्रभिन्नेन गजेन, राजकर्माणि अकुर्वता किम् (प्रयोजनम् अस्ति)। स्थूलः यदि वा अस्थूलः अपि कृत्यकरः पुमान् श्रेयान् (भवति) ॥
(ब) प्रभिन्नेन गजेन, गजकर्माणि अकुर्वता किम् (प्रयोजनम् अस्ति)। यः स्थले वा यदि वा निम्ने कृत्यकरः च (सः) श्रेयान् (भवति) ॥

(A) What is the use of a fully-grown elephant in rut, which does not perform the Royal duties? A big or even a small person, who is capable of carrying out work is indeed always preferred.
(B) What is the use of a fully-grown elephant in rut, which does not perform the Royal duties? One who is able to work on a plain or low ground, is always preferred.

प्रभिन्नेन, गजेन & अकुर्वता- पु. लि. तृ. वि. ए. व. of प्रभिन्न- intoxicated, in rut, गज- elephant & अकुर्वत्- not performing- कुर्वत्- doing, working- वर्त. का. वा. धा. सा. वि. of कृ- करोति- कुरुते ८ ग. उ. प. to do, work- न कुर्वत्- अकुर्वत्- नञ् तत्पुरुष स, राजकर्माणि & गजकर्माणि- both in न. लि. द्वि. वि. ब. व. of - royal duty- राजन्- पु. लिं.- king, कर्मन्- न. लिं.- work- राज्ञः कर्म- राजकर्म- ष. तत्पुरुष स. & गजकर्म- work of an elephant- स्थले & निम्ने- स. वि. ए. व. of स्थल- plain ground & निम्न- adjctv- low land, depression, स्थूलः- great, big, bulky- न स्थूलः- अस्थूलः- नञ् तत्पुरुष स.- slim, small, कृत्यकरः- preforming, functioning- कृत्य- work that is to be done- कृत्य- (also कर्तव्य, करणीय, कार्य)- क. वि. धा. सा. वि. of कृ- to do, करः- one who does, causes- कृत्यम् करोति इति- कृत्यकरः- उपपद तत्पुरुष स., यः- (यद्)- who, पुमान् (पुंस्)- man, human & श्रेयान् (श्रेयस्)- superior, preferable- all in पु. लि. प्र. वि.

ए. व., किम्- a particle of interrogation: what use?, अपि- also, even, यदि- if, in case, वा- or, and- all अव्ययs

न गणस्याग्रतो गच्छेत् सिद्धे कार्ये समं फलम् ।
यदि कार्यविपत्तिः स्यान्मुखरस्तत्र हन्यते ॥३३१॥ - हितोपदेश प्र. १ श्लो.२९

(कः अपि) गणस्य अग्रतः न गच्छेत्। (गणस्य) सिद्धे कार्ये (सर्वे) समम् फलम् (प्राप्नुवन्ति)। यदि कार्यविपत्तिः स्यात् तत्र मुखरः हन्यते॥

No one should go at the head of a group. If the project is successful, everyone will get equal credit. However, if there is a disaster, (only) the leader is blamed!

गणस्य- पु. लिं. ष. वि. ए. व. of गण- group, multitude, troop, समम् & फलम्- न. लिं. द्वि. वि. ए. व.- of समम्-adjctv- equal, even & फलम्- fruit, reward, कार्यविपत्तिः- failure of the work, mishap of the project- कार्य- (also करणीय, कर्तव्य & कृत्य)- क. वि. धा. सा. वि. of कृ- करोति- कुरुते ८ ग. उ. प. to do, make, विपत्तिः- स्त्री. लिं.- calamity, mishap, disaster- कार्यस्य विपत्तिः- कार्यविपत्तिः- ष. तत्पुरुष स.- in स्त्री. लिं. प्र. वि. ए. व., सिद्धे & कार्ये- न. लिं. स. वि. ए. व.- of सिद्धम्- accomplished, completed, succeeded- सिद्ध- क. भू. धा. वि. of सिध्- सिध्यति ४ ग. प. प. to accomplish, fulfill & कार्यम्- work, project - (see above), गच्छेत् & स्यात्- both in विध्यर्थ प्र. पु. ए. व. of गम्- गच्छति १ ग. प. प. to go, proceed & अस्- अस्ति २. ग. प. प. to be, to exist, मुखरः- a leader, a person making loud noise- in पु. लिं. प्र. वि. ए. व., हन्यते- कर्मणि प्रयोग प्र. पु. ए. व. of हन्- हन्ति २ ग. प. प. to strike, kill, तत्र- there, in that case, then, अग्रतः (अग्रतस्)- before, in front, at the head of, न- no, not, यदि- if, in case, in the event of- all अव्ययs

न स्वल्पस्य कृते भूरि नाशयेन्मतिमान् नरः।
एतदेवात्रपाण्डित्यं यत्स्वल्पाद्भूरिरक्षणम् ॥३३२॥ - पञ्चतन्त्र, मित्रभेद

मतिमान् नरः स्वल्पस्य कृते भूरि न नाशयेत्। यत् स्वल्पात् अत्र भूरिरक्षणम् (करोति), एतद् एव पाण्डित्यम् (अस्ति)॥
A wise person should not destroy the big part to save a small piece. Indeed, (real) wisdom in this world is saving the bulk by sacrificing a little (if need be.)

मतिमान् (मतिमत्)- a wise or intelligent person- मतिः -स्त्री. लिं.- intellect, knowledge- मत्- suffix implies: possession, quality & नरः -man, person, both in पु. लि. प्र. वि. ए. व., स्वल्पस्य- ष. वि. & स्वल्पात्- पं. वि.- ए. व. of स्वल्प-adjctv- small, little, bit, कृते- for the sake of- स. वि. ए. व. of कृत- done, work- क. भू. धा. वि. of कृ- करोति- कुरुते ८ ग. उ. प.,

नाशयेत्- प्रयोजक विध्यर्थ प्र. पु. ए. व. of नश्- नश्यति ४ ग. प. प. to get destroyed, lose, एतद्- that, it, पाण्डित्यम्- scholarship, prudence, wisdom & भूरिरक्षणम्- न. लि. प्र. वि. ए. व., भूरि- अव्यय- very much & रक्षणम्- protection, saving- अव्यय पूर्वपद कर्मधारय स. भूरि- large, very big, very much, न- no, not, यद्- that, since, because, एव- just, mere, alone, अत्र- here, in this place-all अव्यय

परिज्ञातोपभुक्तो हि भोगो भवति तुष्टये ।
विज्ञाय सेवितो मैत्रीमेति चोरो न शत्रुताम् ॥३३३॥ -योगवासिष्ठ ४. २३. ४१

परिज्ञातोपभुक्तः भोगः हि तुष्टये भवति। विज्ञाय सेवितः चोरः मैत्रीम् एति, न शत्रुताम् (एति)॥

A controlled (fully understood) but thoroughly enjoyable pleasure indeed brings real satisfaction. A well-served thief will develop into a friend and not into an enemy.

परिज्ञातोपभुक्तः-a well understood pleasure, परिज्ञात- well understood, fully realised- उपभुक्तः-thoroughly enjoyed- both क. भू. धा. वि. of परि+ ज्ञा- to know, (ज्ञा- जानाति- जानीते ९ ग. उ. प to understand, know) & उप +भुज्- to enjoy, taste- (भुज्- भुनक्ति- भुंक्ते ७ ग. उ. प. to eat, enjoy)- परिज्ञातः उपभुक्तः- परिज्ञातोपभुक्तः- विशेषणपूर्वपद कर्मधारय स., भोगः- enjoyment, sensual pleasure, wealth; सेवितः- practiced, pursued, frequented- क. भू. धा. वि. of सेव्- सेवते- १ ग. आ. प. to serve, attend upon, चोरः- thief- all in पु. लिं. प्र. वि. ए. व., तुष्टये- स्त्री. लिं. च. वि. ए. व. of तुष्टि- pleasure, satisfaction- (तुष्ट- pleased- क. भू. धा. वि. of तुष्- तुष्यति ४ ग. प. प. to be please, happy), भवति & एति- वर्त. प्र. पु. ए. व. of भू- १ ग. प. प. to be, to exist, happen & इ- २ ग. प. प. to go, to come to, विज्ञाय- after knowing, realizing- पू. का. वा. ल्यबन्त धा. सा. अव्यय of वि+ ज्ञा- to be aware of, to find out; मैत्रीम् & शत्रुताम्- स्त्री. लिं. द्वि. वि. ए. व. of मैत्री- friendship & शत्रुता- enmity, hostility, हि- indeed, surely & न- no, not- both अव्यय

बहवो न विरोद्धव्या दुर्जयो हि महाजनः।
स्फुरन्तमपि नागेन्द्रं भक्षयन्ति पिपीलिकाः ॥३३४॥ -पञ्चतन्त्र

बहवः न विरोद्धव्याः न (क्रियन्ते)। महाजनः दुर्जयः हि (भवति)। पिपीलिकाः स्फुरन्तम् नागेन्द्रम् अपि भक्षयन्ति॥

One should not oppose large group (multitude) of people. They are difficult to win over. An army of ants can devour even a heavily throbbing king cobra.

बहवः, विरोद्धव्याः & पिपीलिकाः- पु. लिं. प्र. वि. ब. व. of बहु- adjctv- many, large, plenty, विरोद्धव्य- to be opposed, to be gone against- -(also- विरोधनीय & विरोध्य)- क. वि. धा. सा. वि. of वि+ रुध्- to oppose, obstruct- (रुध्- रुणद्धि- रुंद्धे ७ ग. उ. प. to stop, oppose, hinder, arrest) & पिपीलिक- an ant, दुर्जयः- one who is difficult to win over- दुःखेन जीयते इति- दुर्जयः- उपपद तत्पुरुष स. & महाजनः- great person, large number of people- महत्- great, large, many, big, जनः- people- महान् जनः- महाजनः- कर्मधारय स.- both in- पु. लिं. प्र. वि. ए. व., स्फुरन्तम् & नागेन्द्रम्- both in- पु. लिं. द्वि. वि. ए. व. of स्फुरन्- throbbing, trembling- वर्त. का. वा. धा. सा. वि. of स्फुर्- स्फुरति ६ ग. प. प. to throb, spring forward & नागेन्द्र- king of snakes- नाग- snake, serpent, इन्द्र- lord, master- नागनाम् इन्द्रः- नागेन्द्रः- ष. तत्पुरुष स., भक्षयन्ति- वर्त. प्र. पु. ब. व. of भक्ष्- भक्षयति- ते १० ग. उ. प. to eat, devour, consume, bite, न- no, not, अपि- even, also, हि- indeed, surely- all अव्ययs

अविद्यः पुरुषः शोच्यः शोच्यं मैथुनमप्रजम्।
निराहाराः प्रजाः शोच्याः शोच्यं राष्ट्रमराजकम् ॥३३५॥ -महाभा उद्योगपर्व ३९.७७

अविद्यः पुरुषः शोच्यः (अस्ति)। अप्रजम् मैथुनम् शोच्यम् (अस्ति)। निराहाराः प्रजाः शोच्याः (सन्ति) । अराजकम् राष्ट्रम् शोच्यम् (अस्ति)॥

One feels sorry for an ignorant person. A married couple with no intention to procreate is inappropriate. Starving population is distressing. An anarchical country is pitiable.

अविद्यः, पुरुषः, शोच्यः - all in पु. लि. प्र. वि. ए. व. of अविद्य- ignorant, uneducated, foolish, unwise- न विद्य- अविद्य- नञ् तत्पुरुष स., पुरुष- person, man, शोच्य- one to be deplored, pitiable, mourned- (also शोचनीय & शोचितव्य)- क. वि. धा.सा. वि. of शोच्- शोचति १ ग. प. प. to mourn, feel pity, sorry, मैथुनम्- couple, copulation, paired in marriage, union, अप्रजम्- one without a child- प्रजा (प्रजस्)- subject, people, progeny, children- न प्रजम्- अप्रजम्- नञ् तत्पुरुष स., शोच्यम्- see above, अराजकम्- anarchical, having no ruler, king- राजन् (राजा)- king, क- suffix implies: with, having- न राजक- अराजक- नञ् तत्पुरुष स., राष्ट्रम्- country, nation, शोच्यम्- all in न. लि. प्र. वि. ए. व., निराहाराः प्रजाः शोच्याः- all in स्त्री. लि. प्र. वि. ब. व. of निराहारा- starved, hungry- आहार- food, निस् (निर्)- अव्यय- suffix implies devoid of, absence of, प्रजा- subject, people, progeny,

नष्टं मृतमतिक्रान्तं नानुशोचन्ति पण्डिताः।
पण्डितानां च मूर्खाणां विशेषोऽयं यतः स्मृतः ॥३३६॥ --सुभाषितरत्नभाण्डागार

पण्डिताः नष्टम्, मृतम् (तथा) अतिक्रान्तम्, न अनुशोचन्ति। यतः अयम् पण्डितानाम् च मूर्खाणाम् विशेषः (इति) स्मृतः (अस्ति)॥

Wise people mourn neither destroyed things nor death of (near and dear) person nor past happenings. From this, the characteristics of wise and stupid people are remembered.

पण्डिताः- पु. लिं. प्र. वि. ब. व. of पण्डित- wise, learned, scholar, नष्टम्, मृतम् & अतिक्रान्तम्- all in न. लिं. द्वि. वि. ए. व. of नष्ट- lost, destroyed, vanished, मृत- dead & अतिक्रान्तम्- things of past, things surpassed- all three क. भू. धा. वि. of नश्- नश्यति ४ ग. प. प. to be lost, vanish, perish, मृ- म्रियते ६ ग. आ. प. to die, depart from life & अति+ क्रम्- to surpass, to elapse- (क्रम्- क्रामति- क्रमते १ ग. उ. प. & क्राम्यति- ४ ग. प. प. to walk, approach, pass, अनुशोचन्ति- वर्त. प्र. पु. ब. व. of अनु+ शुच्- to mourn over, regret- (शुच्- शोचति १ ग. प. प. to be sorry, to grieve for), पण्डितानाम् & मूर्खाणाम्- पु. लिं. ष. वि. ब. व. of पण्डित- wise learned & मूर्ख- stupid, foolish, अयम्, विशेषः & स्मृतः- all in पु. लिं. प्र. वि. ए. व. of इदम्- this, it, विशेष- adjctv- discrimination, distinction, characteristic, speciality & स्मृत- said, defined, prescribed, laid down- क. भू. धा. वि. of स्मृ- स्मरति- १ ग. प. प. to remember, lay down, declare, न- no, not, च- and & यतः (यतस्)- whence, because of this, due to this- all अव्यय

अशोच्यानीह भूतानि यो मूढस्तानि शोचति।
स दुःखे लभते दुःखं द्वावनर्थौ निषेवते ॥३३७॥ - सुभाषितरत्नभाण्डागार

यः मूढः इह अशोच्यानि तानि भूतानि शोचति, सः दुःखे लभते दुःखम् (तथा) द्वौ अनर्थौ निषेवते॥

In this world, an ignorant person, who grieves over happenings not worth mourning about, suffers more agony.Thus, he experiences double suffering.

यः (यद्)- who, मूढः- stupid, foolish, ignorant, सः (तद्)- he- all in पु. लिं. प्र. वि. ए. व., अशोच्यानि, तानि & भूतानि- न. लिं. द्वि. वि. ब. व. of अशोच्यम्- not worth mourning- शोच्यम्- to be mourned, repented- शोच्य (also शोचितव्य & शोचनीय)- क. वि. धा. सा. वि. of शुच्- १ ग. प. प. to mourn, repent, grieve- न शोच्य- अशोच्य-नञ् तत्पुरुष स., तद्- that, it & भूत- a thing, being, happening- क. भू. धा. वि. of भू- भवति १ ग. प. प. to be, to exist, शोचति, लभते & निषेवते- all वर्त. प्र. पु. ए. व. of शुच्- १ ग. प. प. to mourn, repent, grieve, लभ्- १ ग. आ. प. to get, obtain & नि+ सेव्- to experience, suffer, enjoy- (सेव्- सेवते १ ग. आ. प. to serve, attend upon), दुःखे- स. वि. ए. व. & दुःखम्- द्वि. वि. ए. व. -both of दुःखम्- न. लिं.- sorrow, misery, torture, suffering, द्वौ & अनर्थौ- both न. लिं. द्वि. वि. द्वि. व. of द्वि- two & अनर्थ- mishap, trouble, loss- अर्थ- purpose, gain, wealth- अन् अर्थम्- अनर्थम्- नञ् तत्पुरुष स., इह- अव्यय- here, in this world

मुहूर्तं ज्वलितं श्रेयो न धूमायितं चिरम् ।
मा स्म ह कस्यचिद्गेहे जनि राज्ञः खरः मृदुः ॥३३८अ॥   - महाभारत उद्योगपर्व ५.१३४

(Said by Queen Vidula to son Sanjay, who was scared of going to war)

मुहूर्तमपि राजेन्द्र तिन्दुकालातवज्ज्वलेत्।
न तुषाग्निरिवानर्चिर्धूमायेत चिरं नरः ॥३३८ब॥ -महाभारत शान्तिपर्व अ. १४०.१९

अ) मुहूर्तम् ज्वलितम् श्रेयः (भवति), चिरम् धूमायितम् (श्रेयः) न (भवति)। कस्यचित् राज्ञः गेहे, खरः मृदुः जनिः मा स्म ह (भवेत्) ॥
ब) राजेन्द्र, नरः तिन्दुकालातवत् मुहूर्तम् अपि ज्वलेत्, न तुषाग्निः इव अनर्चिः चिरम् धूमायेत ॥

A) A moment of blazing (like a fire) is much better than keeping on smoking for a long time. In any Royal house, let there be no offspring, who is hurtful or mild nature, take birth.
B) Oh Lord among the Kings, a man should blaze like a fire of Tinduka wood, even for a moment rather than keep smoking for a long time, without any flame, like burning of a heap of husk.

अ) मुहूर्तम्, ज्वलितम्, श्रेयः, चिरम् & धूमायितम्- all in न. लिं. प्र. वि. ए. व. of मुहूर्तम्- moment, a short period, ज्वलितम्- burning, blazing- ज्वलित- क. भू..धा. वि. of ज्वल्- ज्वलति- to burn, blaze, glow, श्रेयस्- adjctv- better, preferable, चिरम्- long time, धूमायितम्- smoking- धूमः- smoke- धूमायित- क. भू..धा. वि. of धूम्- धूमायति- ते- १० ग. उ. प. to smoke, कस्यचित् & राज्ञः- both in- पु. लिं. ष. वि. ए. व. of- कश्चित्- any, someone & राजन्- king, खरः- adjctv- very strict, hurtful, extreme, मृदुः- adjctv- soft, mild, timid, जनिः- offspring, birth, production- all in पु. लिं. प्र. वि. ए. व., गेहे- in न. लिं. स. वि. ए. व. of गेहम्- house, habitation, मा- a particle of prohibition- lest, that not, स्म- a particle added to the present tense, giving them sense of past tense, ह - a particle used to lay stress on the preceding word- मा स्म ह- let that not indeed happen न- no, not- all अव्ययs
ब) राजेन्द्र- Lord among the Kings- राजन्- king, इन्द्रः- lord, master- राज्ञाम् इन्द्रः- राजेन्द्रः- ष. तत्पुरुष स.- in पु. लिं. सं. वि. ए. व., नरः - man, person, तिन्दुकालातवत्- like a strong fire of Tinduka wood- तिन्दुकः -(also तिन्दुः, तिन्दुलः)- name of type of tree/wood, अलात- strong fire, वत्- adjctv- an affix added to nouns to show quality, possession- तिन्दुकस्य अलातः- तिन्दुकालात- strong fire of Tinduka wood- ष. तत्पुरुष स. & तुषाग्निः- husk fire- तुषः -husk, chaff of grain, अग्निः- fire- तुषस्य अग्निः- ष. तत्पुरुष स.- all in पु. लिं. प्र. वि. ए. व., अनर्चिः- न. लिं. प्र. वि. ए. व. of अनर्चिस्- one without fire- अर्चिस्- flame, lustre, blaze- अन् अर्चिः-

अनर्चिः- नञ् तत्पुरुष स., ज्वलेत्- (प. प.) & धूमायेत- (आ. प.)- विध्यर्थ प्र. पु. ए. व. of ज्वल्- & धूम्-see above, अपि-even, also, इव- like, as, न- no, not- all अव्ययs

यो यथा वर्तते यस्मिंस्तस्मिन्नेव प्रवर्तयन् ।
नाधर्मं समवाप्नोति न चाश्रेयश्च विन्दति॥३३९॥ - महाभा. उद्योगपर्व१७८.५३

यः यथा यस्मिन् वर्तते, (सः) तस्मिन् एव प्रवर्तयन् (भवेत्)। (सः) अधर्मम् न समवाप्नोति, न च अश्रेयः च विन्दति॥

One should deal with another person in the same way he deals with him. (In doing so), he acquires neither (the demerits) of wrong conduct (Adharma) nor any blemish.

यः -(यद्)- who & प्रवर्तयन्- one who is causing to act- प्रयोजक वर्त. का. वा. धा. सा. वि. of प्र+ वृत्- प्रवर्तयति-ते- to cause, to instigate- (वृत्- वर्तते- १ ग. आ. प. to be, to behave)- both in पु. लिं. प्र. व. ए. व., अधर्मम् & अश्रेयः- both in न. लिं. द्वि. व. ए. व. of अधर्म- wrong codes of conduct, against right behaviour- न धर्म- अधर्म & अश्रेयस्- bad, inferior, wrong- श्रेयस्- superior, good, noble- न श्रेयस्- अश्रेयस्- both नञ् तत्पुरुष स., यस्मिन्- to whom & तस्मिन्- to him- both in पु. लिं. स. व. ए. व., यद्- who & तद्- he, वर्तते, समवाप्नोति & विन्दति- वर्त. तृ. पु. ए. व. of - वर्त. प्र. पु. ए. व. of वृत्- वर्तते १ ग. आ. प. to be, to behave, सम्+ अव+ आप्- to get, acquire- (आप्- आप्नोति- ५ ग. प. प. to get, obtain) & विद्- ६ ग. उ. प. to get, obtain, acquire, यथा- in which manner, as what, as, एव- alone, only, just, च-and, न-no, not- all अव्यय

वरं न राज्यं न कुराजराज्यं
वरं न मित्रं न कुमित्रमित्रम्।
वरं न शिष्यो न कुशिष्यशिष्यो
वरं न दारा न कुदारदाराः ॥३४०॥ -चाणक्यनीतिदर्पण अ.६, श्लो.१२

न राज्यम् वरम्, न कुराजराज्यम् (वरम् भवति)। न मित्रम् वरम्, न कुमित्रमित्रम् (वरम् भवति)। न शिष्यः वरम्, न कुशिष्यशिष्यः (वरम् भवति)। न दाराः वरम्, न कुदारदाराः (वरम् भवन्ति) ॥

It is better not to have a country, than having one with a bad ruler. It is better to be without a friend than having an unreliable friend. It is better to be without a disciple, than to have a bad one. It is better to be without a wife than having a bad one.
राज्यम्- न. लिं.- kingdom, country, state, nation, कुराजराज्यम्- country ruled by a bad king- राजन्- पु. लिं.- king- कुत्सितः राजा- कुराजा- कर्मधारय स. & कुराज्ञः राज्यम्- कुराजराज्यम्- ष. तत्पुरुष स., मित्रम्- न. लिं.- friend, कुत्सितम् मित्रम्- कुमित्रम्- कर्मधारय स. &

